अभिनवधारा ABHINAVDHARA InternationalJournal of Innovation in Indic Studies
International Journal of Innovation in Indic Studies
ISSN: ISSN: 2583-5149 | Vol-4, Issue-1 | July 2026

अभिज्ञानशाकुन्तले वैदिकतत्त्वानां समीक्षात्मकमध्ययनम्

डॉ. ज्योति
सह – प्राध्यापिका, संस्कृत विभाग
जानकी देवी मेमोरियल महाविद्यालय

प्रस्तावना

विश्वस्य वृहत्तम-वाङ्मयेषु संस्कृतभाषायाः वाङ्मयं मूर्धन्यस्थानम् बिभर्ति। संस्कृतसाहित्यं न केवलं भाषिकदृष्ट्या समृद्धमस्ति, अपितु भारतीयसभ्यतायाः, संस्कृतेः, दर्शनस्य, आध्यात्मिकचिन्तनस्य तथा जीवनमूल्यानां महत्त्वपूर्णं संवाहकमपि अस्ति। अस्मिन् वाङ्मये वेदाः सर्वप्राचीनाः ज्ञानविज्ञानस्य आधारभूताश्च ग्रन्थाः मन्यन्ते। वेदेषु प्रतिपादितानि जीवनदर्शनम्, प्रकृतिचिन्तनम्, नैतिकमूल्यानि, सामाजिकव्यवस्था, आध्यात्मिकचेतना च भारतीयसंस्कृतेः मूलाधाररूपेण प्रतिष्ठितानि सन्ति। एतेषां वैदिकतत्त्वानां प्रभावः परवर्तिनि संस्कृतसाहित्येऽपि विविधरूपेण दृश्यते।वाङ्मयेऽस्मिन् यद्यपि वेदाः एव आदिग्रन्थाः मन्यन्ते तथापि लौकिक साहित्यस्य कवीनां गणना-प्रसङ्गे महाकविः कालिदासः प्रथमं स्थानमलङ्करोति। महाकवेः काव्यैः भारतीयसंस्कृतेः "सत्यं शिवं सुन्दरम्" सदृशी मंगल-भावनायाः अभिव्यक्तिः युगयुगान्तरेष्वपि करिष्यते। अद्यप्रभृत्यपि न कोऽपि तस्य समीपवर्ती स्थाने उपवेष्टुं समर्थो। प्रस्तुतशोधपत्रे अभिज्ञानशाकुन्तले वर्णिता वैदिक संस्कृतेः, जीवनमूल्यानामुपदेशानाञ्च व्यावहारिकी एवं वैज्ञानिकी व्याख्या सहृदयानां समक्षमुपस्थापयितुं प्रयासः क्रियते। अध्ययनस्य प्रतिपाद्यमस्ति यत् कालिदासस्य काव्याः मात्रं प्रेमविरहं पुनर्मेलनञ्च न दर्शयन्त्यपितु भारतीय-वैदिकजीवनदर्शनस्य चापि साहित्यकीमभिव्यक्तिमुस्थापयन्ति।

Keywords (बीजशब्दाः):

अभिज्ञानशाकुन्तलम्, महाकविः कालिदासः, वैदिकतत्त्वानि, वैदिकसंस्कृतिः, भारतीयजीवनदर्शनम्, आश्रमव्यवस्था, गुरुकुलपरम्परा, प्रकृतिचेतना, नैतिकमूल्यानि, वैदिकजीवनमूल्यानि, भारतीयसंस्कृतिः।

महाकविः कालिदासः स्वकाव्येषु भारतीयसंस्कृतेः चिरस्थायि-आदर्शानाम् कान्तासम्मिताभिव्यक्तिं अतीव कुशलतया करोति। अस्य काव्येषु भारतीयेतिहासस्य अन्तरात्मा प्राणतत्त्वश्च सुनिहितौ वर्तेते। कालिदासस्य सर्वे काव्याः वैदिक सभ्यतायाः अभिव्यञ्जनां प्रस्तूयन्ते, परम् अभिज्ञानशाकुन्तलम् सर्वेषु अन्यतममतुलनीयञ्च। उक्तमपि -

"काव्येषु नाटकं रम्यं तत्र रम्या शकुन्तला।"

यथा '**महाभारतम् पञ्चमो वेदः'** तादृक् यदि **'शाकुन्तलम् षष्ठो वेदः'** कथ्यते तर्हि न कापि प्रतिपत्तिः। यतोहि शाकुन्तले पगे-पगे वैदिकानाम् ऐतिहासिकानाम् भौगोलिकानाम् श्रौतस्मार्तानाञ्च ज्ञानस्याजस्रधारा अक्षुण्णरूपेण स्रविता भवति। साकमेव छन्दोऽलङ्काराणामपि मञ्जुलसञ्योजनम् सहृदयपाठकान् रसास्वादेन अभिभवति।

भारतीयसंस्कृतेः आदिज्ञानराशिवेदाः वर्णाश्रमव्यवस्थायाः अत्यन्तं व्यावहारिकं वर्णनमुपस्थाप्यन्ति। चतुर्षु वर्णेषु सामञ्जस्यभावनायाः, प्रेम्णः, सद्भावनायाश्च व्यवहारः द्रष्टुं शक्यते। वैदिकवर्णव्यवस्थायां कर्मणः प्राधान्यमासीत्[1] तथा सर्वेषां सामाजिक-उत्तरदायित्वानां समन्वयोऽभिप्रेतः आसीत्।[2]

महाकविकालिदासेनापि अभिज्ञानशाकुन्तले कर्मानुसारि-वर्णव्यवस्थायाः प्रतिबिम्बं परिलक्षितम्। शकुन्तलायाः उत्पत्तिः क्षत्रिये कुले जाता, परन्तु तपोवने लालने-पालने सति सा तपोवनस्य क्रियाणां सम्पादनमतीव निष्ठया कुशलतया च करोति। आश्रमवासिनाम् रक्षासन्दर्भे राजा दुष्यन्तः क्षत्रियवर्णस्य उत्तममुदाहरणं प्रदर्शयति ।

अनुकारिणी पूर्वेषां युक्तरूपमिदं त्वयि।
आपन्नाभयसत्रेषु दीक्षिताः खलु पौरवाः।।[3]

---

[1] यथेमां वाचं कल्याणीया वदानि जनेभ्यः।
ब्रह्मराजन्याभ्यां शूद्राय चार्याय च स्वाय चारणाय॥ यजु.-27/2

[2] असम्बाधं मध्यतो मानवानां यस्यां उद्वतः प्रवतः समं बहुः।
नानावीर्या ओषधिर्या बिभर्ति पृथिवीः नः प्रथतां राध्यतां नः॥अथर्व. 12/1/2

[3] अभिज्ञानशाकुन्तलम्- 2/16

इन्द्रदेवस्य सहायताप्रसङ्गे दुष्यन्तस्य क्षत्रियधर्मस्य पराकाष्ठाम् द्रष्टुं शक्यते। युद्धे संलग्नेन दुष्यन्तेन स्वर्गमार्गमपि सुष्ठुरूपेण न लक्षितः।[1]

सप्तमेऽङ्के बालमृगेन्द्रेण सह क्रीडन्तं बालकं ऋषिपुत्रं मत्वा दुष्यन्तस्तमवरुद्ध्य कथयति–

"अयि भो महर्षिपुत्र! एवमाश्रमविरुद्धवृत्तिना संयमः।"

सः चिन्तयति यत् बालकस्य एतेन उत्साहेन न स ऋषिपुत्रः प्रतीयते। कर्माधारे तु अस्य वर्णः क्षत्रियः भवितव्यः।प्रसङ्गोऽयं कालिदासस्य कर्माधारित - वर्णव्यवस्थाम् निरूपयति।

आश्रमव्यवस्थायाः परिचयः तु पदे-पदे संवलितः कालिदासेन। आश्रमजीवनस्य प्रमुखं वैशिष्ट्यं संयमः, अनुशासनम्, तपश्चर्या च वर्तते। तपोवने निवसन्ती शकुन्तला ब्रह्मचर्याश्रमनियमान् संयमेन निष्ठया च अनुसरति। तस्याः ब्रह्मचर्यव्रतस्य संकेतः दुष्यन्तस्य वचनेऽपि दृश्यते–

"वैखानसं किमनया व्रतमाप्रदानाद् व्यापाररोधि मदनस्य निषेवितव्यम्।"[2]

गृहस्थाश्रमे प्रवेष्टुं सज्जितां शकुन्तलां पतिगृहं संप्रेष्य महर्षिकण्व: गृहस्थाश्रमस्य महत्ताम् तथा अनिवार्यतां प्रतिपादयति।

"अर्थो हि कन्या परकीय एव तामद्य सम्प्रेष्य परिग्रहीतुः ।"[3]

वानप्रस्थाश्रमस्य वर्णनं शकुन्तलायाः प्रस्थानसमये प्रस्तुतं यदा तात् कण्वः शकुन्तलां गृहस्थाश्रमस्य सर्वान् धर्मान् पूरयित्वा पुनः आश्रमपदे आगमनस्य विषये कथयति -

"भर्त्रा तदर्पितकुटुम्बभरेण सार्धं।
शान्ते करिष्यसि पदं पुनराश्रमेऽस्मिन्।[4]"

सप्तमेऽङ्के अपि कश्यपऋषेराश्रमस्य प्रसङ्गेऽपि उक्तम् -

"नियतैकपतिव्रतानि पश्चात्तरुमूलानि गृहीभवन्ति तेषाम्।[5]"

---

[1] राजा- मातले। असुर संप्रहारोत्सुकेन पूर्वेद्युर्दिवमधिरोहिता मया न लक्षितः स्वर्गमार्गः। 7/5 (गद्यभागः)

[2] अभिज्ञानशाकुन्तलम्- 2/24

[3] अभिज्ञानशाकुन्तलम्- 4/22

[4] अभिज्ञानशाकुन्तलम्-. 4/20

[5] अभिज्ञानशाकुन्तलम्- 7/20

अर्थात् गृहस्थस्योपरान्त तरुमूलानि एव जनानाम् आश्रयाः भवन्ति। एवं आश्रमव्यवस्था जीवनं विविधैः उत्तरदायित्वैः अनुशासनेन च सम्बध्नाति तथा जीवनस्य क्रमिकविकासस्य वैदिकसंकल्पनां प्रतिपादयति।

ब्रह्मचर्यं पालयित्वा गृहस्थाश्रमे प्रविश्य जनाः समाजस्य निर्माणे राष्ट्रस्य संवर्धने च सहायकाः भवन्ति। गृहस्थाश्रमः समाजस्य धुरी वर्तते; अयमेव आश्रमः अन्यान् सर्वान् आश्रमान् पोषयति।

"यथा वायुं समाश्रित्य वर्तन्ते सर्वजन्तवः।
तथा गृहस्थमाश्रित्य वर्तन्ते सर्व आश्रमाः।[1]

यतोहि गृहस्थिनः भूत्वा एव मनुष्याः त्रिभ्य ऋणेभ्यः विमुच्य पञ्चमहायज्ञानाम् अनुष्ठानेन जीवनस्योच्चमूल्यानां प्राप्त्यर्थं योग्याः भवन्ति। स्वाध्यायेन ऋषिऋणात्, यज्ञेन देवऋणात्, सन्तानोत्पादनेन च पितृऋणात् उऋणो भूत्वा एव मनुष्यः मोक्षप्राप्त्यर्थं योग्यः भवति।तैत्तिरीय संहितायामपि उक्तम् -

"जायमानो ह वै ब्राह्मणस्त्रिभिर् ऋणैर्ऋणवान् जायते।
ब्रह्मचर्येण ऋषिभ्यो यज्ञेन देवेभ्यः प्रजया पितृभ्यः॥[2]

सप्तमेऽङ्के कश्यपमुनिः पत्न्या सह देवऋणात् मुक्त्यर्थं तपस्यति।[3] राज्ञा दुष्यन्तेन स्वर्गं गत्वा इन्द्रसहाय्यार्थं युद्धे असुरान् संहृत्य देवऋणात् उऋणिना भूयते। पितृतर्पणस्य प्रसङ्गः षष्ठेऽङ्के अपि द्रष्टुं शक्यते। दुष्यन्तस्य संशयमारूढाः पिण्डभाजः।

"अस्मात्परं बत यथाश्रुति सम्भृतानि को नः कुले निवपनानि नियच्छतीति।
नूनं प्रसूतिविकलेन मया प्रसिक्तं धौताश्रुशेषमुदकं पितरः पिबन्ति ॥[4]

ऋष्यृणसम्पादनार्थं महर्षिः कण्वः स्वाश्रमे नित्यं हवनयज्ञादीनां सम्पादनं करोति। स्वाध्यायेन, धर्मस्य पालनेन च ऋणोऽयं परिपूर्यते।शिष्याः अपि होमवेलासमयस्य परिपालनं कर्तव्येन कुर्वन्ति।[5]

---

[1] मनुस्मृति-3/77

[2] तैत्तिरीयसंहिता — 6/3/10

[3] स्वायंभुवान्मरीचेर्यः प्रबभूव प्रजापतिः।
सुरासुरगुरुः सोऽत्रं सपत्नीकस्तपस्यति।। अभिज्ञानशाकुन्तलम् -7/9

[4] अभिज्ञानशाकुन्तलम्-. 6/25

[5] यावदुपस्थितां होमवेलां गुरवे निवेदयामि। -अभिज्ञानशाकुन्तलम्- 4/2 (गद्यभागः)

पञ्चमहायज्ञानां क्रमबद्धं प्रत्यक्षं च विधानं तु न दृश्यते, तथापि तेषां मूलभावाः विविधेषु प्रसङ्गेषु स्पष्टतया द्रष्टुं शक्यन्ते । ब्रह्मयज्ञस्य भावना कण्वाश्रमे अध्ययन-अध्यापनयोः स्वाध्यायस्य च परम्परायां, देवयज्ञस्य भावना यज्ञहोमाग्निहोत्रादिकर्मसु, यथा कण्वस्य आशीर्वचने[1] देवयज्ञस्य भावना अभिव्यज्यते। पितृयज्ञस्य भावना पितृऋणस्य वंशपरम्परायाश्च निर्वहणे, भूतयज्ञस्य भावना आश्रमस्थितानां मृगपक्षिवृक्षलतादीनां प्रति शकुन्तलायाः स्नेहेन प्रकटीभवति[2] तथा अतिथियज्ञस्य भावना आश्रममागतानां अतिथीनां सत्कारे[3] सम्माने च दृश्यते।

ऋग्वेदे विवाहः धर्मसंस्काररूपेण प्रतिपादितोऽस्ति। अभिज्ञानेऽपि विवाहसंस्कारस्य अपूर्व वर्णनं दरीदृश्यते। शाकुन्तलस्य चतुर्थोऽङ्के तात् कण्वेन शकुन्तलायै प्रदत्तसर्वासाम् उपदेशानाम् आधारो ऋग्वेदस्य दशमाध्यायस्य विवाहसूक्तः एव अस्ति, यत्र वधू गृहे सम्राज्ञीपदं धारयति।[4] महर्षिः कण्वः अपि शकुन्तलायै आदर्शव्यवहारस्य शिक्षां ददाति–श्वशुरकुले आदरेण, विनयेन, सौहार्देन च व्यवहरेत्; गुरूणां शुश्रूषां कुर्यात्, सहपत्नीषु मित्रवत् व्यवहरेत्, पतिं प्रति सौहार्दपूर्ण व्यवहारं कुर्यात् तथा गृहिणीपदं अलङ्कुर्यात्।

"शुश्रूषस्व गुरून्कुरु प्रियसखीवृत्तिं सपत्नीजने
भर्तुर्विप्रकृतापि रोषणतया मा प्रतिपं गमः।
भूयिष्ठं भव दक्षिणा परिजने भाग्येष्वनुत्सेकिनी
यान्त्येवं गृहिणीपदं युवतयो वामाः कुलस्याधयः॥[5]

अस्मिन् श्लोके ऋग्वेदमन्त्राणां व्यञ्जनोद्घोषिता।[6] तात् कश्यपः शकुन्तलाम् उपदिशति यत्–वत्से त्वं पत्युः प्रशंसनीयं पदं ग्रहीत्वा तस्य प्रियाभव तथा च गृहस्थाश्रमस्य कार्येषु संलग्ना भूत्वा

---

1 अपघ्नन्तो दुरितं हव्यगन्धैर्वैतानास्त्वां वह्नयः पावयन्तु

2 यस्य त्वया व्रणविरोपणमिङ्गदीनां, तैलं न्यषिच्यत मुखे कुशसूचिविद्धे।

3 इदानीमेव दुहितरं शकुंतलामतिथिसत्काराय नियुज्य दैवं अस्याः प्रतिकूलं शमयितुं सोमतीर्थं गतः- अभि.शा.-1/13 (गद्यभागः)

4 सम्राज्ञी श्वशुरे भव सम्राज्ञी श्वश्र्वां भव।॥४६॥ ऋ.वे. 10/46

5 अभिज्ञानशाकुन्तलम्- 4/19

6 पूषा त्वेतो नयतु हस्तगृह्याऽश्विना त्वा प्र वहतां रथेन।
गृहान् गच्छ गृहपत्नी यथासो वशिनी त्वं विदथमा वदासि॥२६॥ ऋ.वे. 10/26
गृभ्णामि ते सौभगत्वाय हस्तं मया पत्या जरदष्टिर्यथासः।
भगो अर्यमा सविता पुरंधिर्मह्यं त्वादुर्गार्हपत्याय देवाः॥३६॥ऋ.वे. 10/36

पितावियोगजन्यं दुःखं विस्मार्य गृहिणीपदम् अलङ्कुरु।[1]

अभिजनवतो भर्तुः श्लाघ्ये स्थिता गृहिणीपदे,
विभवगुरुभिः कृत्यैस्तस्य प्रतिक्षणमाकुला।
तनयमचिरात् प्राचीवार्कं प्रसूय च पावनं,
मम विरहजां न त्वं वत्से शुचं गणयिष्यसि ॥[2]

प्रस्थानसमये शकुन्तलायाः मार्गः सुखकारी भवेत् इति मङ्गलकामना महर्षिकण्वस्य आशीर्वचनैः दीयते।"शिवास्तेपन्थानमस्तु।" तथा शान्तानुकूलपवनश्च शिवश्च पन्थाः"[3] ऋग्वेदेऽपि "अनृक्षरा ऋजवः सन्तुपन्थाः।" इति मङ्गलकारिणी वाणी प्रस्तुता।

वेदेषु धर्मस्य स्कन्दत्रयाः प्रतिपादिता यज्ञः, अध्ययनम्, तपश्च[4]। शाकुन्तलेऽपि यज्ञस्य आवरणं तपसश्च महिमा सर्वत्र अनुस्युता वर्तते। तपसा एव ऋषयः आत्मशुद्धिं प्राप्य मन्त्रद्रष्टारः अभवन्। तपोवनस्य प्रभावः राजा दुष्यन्तस्य आचरणेऽपि दृश्यते यतोहि तपोवनं प्रविशन् सः आश्रममृगं हन्तुं प्रवृतो न भवति ।स कथयति–

"न खलु न खलु बाणः सन्निपात्योऽयमस्मिन् मृदुनि मृगशरीरे तूलशाविवाग्निः।"[5]

प्रसङ्गेनानेन ज्ञायते यत्तपोवनस्य करुणापूर्णमहिंसायुक्तं वातावरणम् राज्ञां मनसि अपि प्रभावं जनयति। प्रथमाङ्के दुष्यन्तः आश्रमस्य तपःक्रियासु विघ्नः न भवेदिति स्वागमनस्य प्रयोजनं स्पष्टयति–

"सोऽहमाश्रमिणामविघ्नं क्रियोपलम्भाय धर्मारण्यमिदमायातः।"[6]

तपः केवलं व्यक्तिगतमोक्षस्य साधनम् नास्ति, अपितु प्रकृत्या सह तस्य घनिष्ठसम्बन्धं स्थापयति। तपोवनस्य वृक्षाः, लताः, मृगाः, पक्षिणश्च आश्रमवासिनां जीवनस्य अभिन्नाः अङ्गाः भवन्ति। शकुन्तलायाः वृक्षेषु लतासु च स्नेहः तस्याः तपोवनजीवनस्य संवेदनशीलतां प्रकाशयति। सा वृक्षेषु अपीतेषु स्वयं जलं न पिबति स्म

-

---

[1] इह प्रियं प्रजया ते समृध्यतामस्मिन् गृहे गार्हपत्याय जागृहि।
एना पत्या तन्वं१ सं सृजस्वाऽधा जिव्री विदथमा वदाथः॥२७॥ऋ.वे. 10/27

[2] अभिज्ञानशाकुन्तलम्- 4/21

[3] अभिज्ञानशाकुन्तलम्- 4/11

[4] तापो ब्रह्म यज्ञ पृथिवीं धारयन्ति, यज्ञो वै श्रेष्ठतमं कर्म" - श.ब्रा. 1/7/1/5

[5] अभिज्ञानशाकुन्तलम्- 1/10

[6] अभिज्ञानशाकुन्तलम्- 1/22 (गद्यभागः)

"पातुं न प्रथमं व्यवस्यति जलं युष्मास्वपीतेषु या
नादत्ते प्रियमण्डनापि भवतां स्नेहेन या पल्लवम्।
आद्ये वः कुसुमप्रसूतिसमये यस्या भवत्युत्सवः
सेयं याति शकुन्तला पतिगृहं सर्वैरनुज्ञायताम्॥"[1]

कालिदासेन तपस्या आश्रमजीवनस्य अनिवार्याङ्गरूपेण प्रतिपादिता। नित्यं तपश्चर्यायां संलग्नं ताकण्वं प्रति शकुन्तलायाः चिन्तायुतानि वचनानि तपसः महत्त्वं सूचयन्ति। सा कथयति–

"तपश्चरणपीडितं तातशरीरं तन्मात्रमति मात्रं मम कृते उत्कण्ठितुम्।"

कण्वस्य तपोबलं तस्य व्यक्तित्वे आध्यत्मिकप्रभावम् द्योतयति। शकुन्तलायाः विवाहसमये वनदेवताभिः तस्यै मङ्गलकारीणि वस्तूनि वस्त्राणि च तात्कण्वस्य तपसः प्रभावात् एव प्रदत्तानि

"तत्रभवता वयमाज्ञप्ताः शकुन्तलाहेतोर्वनस्पतिभ्यः कुसुमान्याहरत।

दुर्वासाऋषेः प्रसङ्गेऽपि ऋषितपसः प्रभावः स्पष्टतया दृश्यते। प्रियंवदया शकुन्तलायाः शापविषये निवेदिते सति दुर्वासाः शापस्य पूर्णतया निवर्तनम् अशक्यम् इति ज्ञापयित्वा तस्य शमनस्योपायं निर्दिशति। ऋषीणां वचनानि अनर्थकानि न भवन्ति[2] तपोबलप्रभावात् तेषां वचनानि शक्तियुतानि भवन्ति ।सप्तमेऽङ्के प्रजापतिः कश्यपः अपि सपत्नीकं तपश्चर्यायां संलग्नः दृश्यते–

"स्वायम्भुवान्मरीचेः प्रबभूव प्रजापतिः।
सुरासुरगुरुः सोऽत्र सपत्नीकस्तपस्यति॥"[3]

"यज्ञो वै वेदानां प्राणाः" इति सर्वैः ज्ञायते। गृहे एव यज्ञाग्निं प्रज्वाल्य मन्त्रोच्चारणैः हविः समर्पयित्वा गृहपतिः यज्ञं सम्पादयति स्म। शाकुन्तलेऽपि कालिदासेन स्वनाटकस्य प्रारम्भे एव यज्ञहवनसामग्रीणां विशदविवेचनं प्रस्तुतम्।[4] शकुन्तलायाः प्रस्थानसमये तात् काश्यपः यज्ञाग्नेः पावनशक्तिं स्मरन् आशीर्वचनं ददाति।

---

[1] अभिज्ञानशाकुन्तलम्- 4/9

[2] न मे वचनमन्यथाभवितुमर्हति, किंत्वभिज्ञानाभरणदर्शनेन शापो निवर्तिष्यते।अभिज्ञानशाकुन्तलम्- 4/1(गद्यभागः)

[3] अभिज्ञानशाकुन्तलम् -7/9

[4] वेदिं हुताशनवर्ती परितः प्रयस्ताः।-अभिज्ञानशाकुन्तलम्- 4/11(गद्यभागः)

अमी वेदिं परितः क्लृप्तधिष्ण्याः
समिद्धन्तः प्रान्तसंस्तीर्णदर्भाः।
अपघ्नन्तो दुरितं हव्यगन्धैः
वैतानास्त्वां वहनयः पावयन्तु॥[1]

अत्र यज्ञस्य पवित्रवह्निः शकुन्तलां पावयन्तु इत्यभिलाषः चित्रितः। एवं अभिज्ञानशाकुन्तले सर्वत्र यज्ञ-अध्ययन-तपसां समन्वयेन वैदिकतत्त्वानां संयोजनमुपस्थापितम्।

"अतिथिदेवो भव" इति वेदवाक्यस्य सुष्ठु प्रतीतिः कालिदासस्य सर्वासु कृतिषु द्रष्टुं शक्यते। तेन स्वकाव्येषु अतिथिः सुसम्मानितः सुपूजितश्च।[2] यदा दुष्यन्तः आश्रमे प्रविशति तदा तस्य आतिथ्य-हेतोः फलानाम्, अर्घ्यानाम्, पादोदकानाञ्च सम्यक् व्यवस्था क्रियते स्म।[3] कालिदासमते अतिथिपरिभावः महान् अपराधः आसीत्।

"कस्मिन्नपि पूजार्हेऽपराद्धा शून्यहृदया शकुन्तला।[4]

दुर्वासाऋषेः असत्कारेण शकुन्तलायाः जीवने दुःखपरम्पराणामाविर्भावो जायते।[5]

संस्काराणां वैदिकसंस्कृतौ विशेष स्थानं वर्तते। यद्यपि वेदेषु संस्काराणां साक्षात् वर्णनम् एकस्मिन् स्थाने तु न प्राप्यते, परन्तु कानिचित् विशेषसंस्कारान् आधृत्य यत्र तत्र वर्णनम् उपलभ्यते। विवाहसंस्कारम्[6], अन्त्येष्टिसंस्कारम्[7] तथा गर्भाधानसंस्कारम्[8] आधृत्य अनेके प्रसङ्गाः प्राप्यन्ते।

वैदिकसंस्काराणां धार्मिकं वैज्ञानिकं च महत्त्वं स्वीकृत्यैव कालिदासेन स्वकृतिषु संस्काराणां समावेशः, वैदिकरीत्या च तेषां सम्पादनं कृतम्। रघुवंशे तु संस्काराणां विशदविवेचनं लभ्यते, अभिज्ञानेऽपि प्रसङ्गानुसारं द्वित्राः प्रसङ्गाः द्रष्टुं शक्यन्ते।

षष्ठेऽङ्के श्रेष्ठिनः धनमित्रस्य पत्न्याः पुंसवनसंस्कारः जायते इति सूचना प्रदत्ता।

"देव। इदानीम् एव साकेतस्य श्रेष्ठिनो दुहिता निर्वृत्त पुंसवना जायाऽस्या श्रूयते।[9]

---

[1] अभिज्ञानशाकुन्तलम्- 4/8

[2] इमं जीवितसर्वस्वेनाप्यतिथिविशेषं कृतार्थं करिष्यति। अभिज्ञानशाकुन्तलम्- 1/21 (गद्यभागः)

[3] हला शकुन्तले। गच्छोटजं फलमिश्रमर्घ्यमुपहर। इदं पादोदके भविष्यति।-अभिज्ञानशाकुन्तलम्- 1/22 (गद्यभागः)

[4] अभिज्ञानशाकुन्तलम्- 4/1 (गद्यभागः)

[5] विचिन्तयन्ती यमनन्यमानसा तपोधनं वेत्सि न मामुपस्थितम्।
स्मरिष्यति त्वां न स बोधितोऽपि सन्कथां प्रमत्तः प्रथमं कृतामिव ॥-अभिज्ञानशाकुन्तलम्- 4/1

[6] ऋ.वे. 10/85

[7] ऋ.वे. 10/14, 16, 18

[8] ऋ.वे. 10/183-184

[9] अभिज्ञानशाकुन्तलम्- 6/

सप्तमेऽङ्के जातकर्मसंस्कारस्य उल्लेखो विहितः।

"एषाऽपराजिता नामौषधिस्य जातकर्मसमये भगवता मारिचेन दत्ता।[1]

वेदाध्ययनेन व्रतहोमादिसंस्कारैश्च मानवाः ब्रह्मप्राप्त्यर्थं योग्याः भवन्ति।

वैदिकऋषिः पर्यावरणं प्रति जागरूक आसीत्। यथा सर्वेषु वेदेषु वृक्षाणामौषधीनाञ्च महत्त्वं विवेचितम्, तथैव शाकुन्तलेऽपि कालिदासेन पर्यावरण-रक्षणार्थम् अनेके प्रसङ्गाः प्रस्तुताः। शकुन्तलायाः वृक्षैः लताभिश्च सह एतादृशी आत्मीयता दर्शिता यत् सा वृक्षेभ्यः जलं दत्त्वैव स्वयं जलपानं करोति स्म। तस्याः प्रस्थानसमये जीवजन्तुनां विकलता अत्यन्तं मार्मिकरूपेण प्रस्तूयते।

उद्गलितदर्भकवलाः मृगाः परित्यक्तनर्तनाः शिखरिणः।
शाखासु वल्कलानि च दृष्ट्वा हृदयं मे विदीर्णमिव॥[2]

तथा च

यस्य त्वया व्रणविरोपणमिङ्गुदीनां,
तैलं न्यषिच्यत मुखे कुशसूचिविद्धे।
श्यामाकमुष्टि परिवर्धितको ज़हाति,
सोऽयं न पुत्र कृतकः पदवीं मृगस्ते ॥[3]

कविना बाह्यप्रकृतेः स्पन्दनशीलस्वभावं प्रकटितम् । तस्यां जीवनं भावाश्च विद्यन्ते, सा मानवस्य सहचरी भूत्वा तस्य सुखदुःखेषु शरणस्थली इव व्यवहरति। शाकुन्तले प्रकृतेः सजीवीकरणं दृश्यते। पतिगृहप्रस्थानवेलायाम् अपि काश्यपेन तपोवन-तरवः लताश्च सम्बोधिताः।

अनुमतगमना शकुन्तला तरुभिरियं वनवासबन्धुभिः।
परभृतविरुतं कलं यथा प्रतिवचनीकृतमेभिरीदृशम्॥[4]

<u>उपसंहारः</u>

---

[1] अभिज्ञानशाकुन्तलम्- 7/1

[2] अभिज्ञानशाकुन्तलम्- 4/12

[3] अभिज्ञानशाकुन्तलम्- 4/14

[4] अभिज्ञानशाकुन्तलम्- 4/10

अभिज्ञानशाकुन्तलस्य समग्राध्ययनेनिदं समीक्ष्यते यत् कालिदासेन नाटकेऽस्मिन् केवलं प्रेम-विरह-पुनर्मिलनादीनां भावानामेव चित्रणं न कृतम्, अपितु वैदिकजीवनदृष्टेः विविधाः मूल्याः अपि काव्यात्मकरूपेण प्रतिपादिताः। कालिदासः मानवीयजीवनस्य प्रत्येकस्मिन् पक्षे धर्मस्य तथा नैतिकतायाः महत्त्वं प्रतिपादयति। नाटकस्य घटनाक्रमः स्पष्टयति यत् मनुष्यस्य वास्तविकं व्यक्तित्वं तस्य बाह्यवैभवेन न, अपितु सदाचारः, कर्तव्यनिष्ठा, आत्मसंयमः तथा विवेकपूर्णव्यवहारः इत्यादिभिः गुणैः निर्मीयते। एषा दृष्टिः वैदिकवाङ्मये प्रतिपादितस्य ऋतस्य तथा धर्मस्य अवधारणया सह सामञ्जस्यं धारयति।

विशेषतः नाटकस्य चतुर्थाङ्के शकुन्तलायाः प्रस्थानप्रसङ्गे कण्वऋषेः उपदेशः भारतीयकुटुम्बव्यवस्थायाः सामाजिकमर्यादानां च परिचायकः अस्ति। तत्र कन्यायाः वैवाहिकजीवनं, पारिवारिकसम्बन्धानां निर्वहणम्, ज्येष्ठानां प्रति आदरभावः तथा गृहस्थजीवनस्य दायित्वानि अत्यन्तं मार्मिकतया वर्णितानि सन्ति। कण्वस्य उपदेशेषु निहिताः सदाचारसम्बद्धाः भावाः व्यक्तेः सामाजिकजीवने नैतिकदायित्वस्य महत्त्वं बोधयन्ति। एते विचाराः वैदिकसंस्कृतेः संस्कारप्रधानजीवनपद्धतेः निरन्तरतां प्रकाशयन्ति।

अभिज्ञानशाकुन्तले धर्मस्य अवधारणा केवलं धार्मिककर्मकाण्डेषु सीमिता नास्ति, अपितु सा व्यवहारिकजीवनस्य आधाररूपेण प्रतिष्ठिता अस्ति। पात्राणां कर्तव्यपालनम्, वचनस्य महत्त्वम्, सत्यस्य प्रतिष्ठा, आत्मगौरवस्य संरक्षणं तथा अन्येषां प्रति संवेदनशीलता इत्यादयः गुणाः धर्मस्य व्यापकस्वरूपं प्रकटयन्ति। नाटकस्य दार्शनिकपक्षे कर्मफलसिद्धान्तस्य अपि महत्त्वपूर्णं स्थानं दृश्यते। दुर्वाससः शापः कथानकस्य विकासे महत्त्वपूर्णं कारणं भवति। अस्य प्रसङ्गस्य माध्यमेन कालिदासः मानवीयजीवने कर्तव्यपरायणतायाः तथा परिस्थितिजन्यपरिणामानां गम्भीरतां सूचयति।

कालिदासस्य प्रकृतिवर्णनमपि अस्य अध्ययनस्य महत्त्वपूर्णः पक्षः अस्ति। आश्रमजीवनस्य चित्रणं मानवानां प्रकृत्या सह अविच्छिन्नसम्बन्धं दर्शयति। वृक्षाः, लताः, मृगाः, पक्षिणः, नद्यः तथा वनप्रदेशाः नाटकस्य केवलं पृष्ठभूमिरूपेण न तिष्ठन्ति, अपितु कथानकस्य भावात्मकविकासे सक्रियभूमिकां निर्वहन्ति। प्रकृतेः प्रति मानवीयसंवेदनशीलता, जीवमात्रे मैत्रीभावः तथा पर्यावरणस्य प्रति उत्तरदायित्वम्

अद्यतनपरिप्रेक्ष्येऽपि अत्यन्तं प्रासङ्गिकानि सन्ति। एतादृशी भावना वैदिकवाङ्मये प्रतिपादितेन सर्वभूतहितस्य तथा सहअस्तित्वस्य आदर्शेन सम्बद्धा अस्ति।

अपरञ्च, नाटके वर्णिताः यज्ञीयाः तथा धार्मिकाः प्रसङ्गाः वैदिकपरम्परायाः अनुष्ठानात्मकपक्षं परिचाययन्ति। आश्रमस्य ऋषयः तपसा, स्वाध्यायेन तथा यज्ञकर्मणा समाजस्य आध्यात्मिककल्याणाय प्रयतन्ते। अत्र ज्ञानस्य, साधनायाः तथा लोकहितस्य परस्परसम्बन्धः स्पष्टतया अवगम्यते। एतेन भारतीयपरम्परायां व्यक्तिगतसाधनायाः सामाजिकदायित्वस्य च समन्वयः प्रकाशते।

एवं समग्रदृष्ट्या अभिज्ञानशाकुन्तलं प्राचीनभारतीयजीवनदृष्टेः वैविध्यं समुपस्थापयति। अस्य नाटकस्य अध्ययनं न केवलं कालिदासस्य काव्यकौशलम् बोधयति, अपितु वैदिकपरम्परायाः लौकिकसंस्कृतसाहित्ये कथं साहित्यिकरूपान्तरणं जातमिति ज्ञातुमपि अवसरं प्रददाति। अनेन दृष्ट्या प्रस्तुतनाटकं प्राचीनज्ञानपरम्परायाः आधुनिकजीवनस्य च मध्ये सेतुरूपेण कार्यं करोति। अतः अभिज्ञानशाकुन्तले अन्तर्निहितानां वैदिकमूल्यानां विश्लेषणं भारतीयसंस्कृतेः सातत्यस्य, तस्याः वैचारिकसमृद्धेः तथा समकालीनोपादेयतायाः अवगमने विशेषमहत्त्वं विदधति।

अतः अभिज्ञानशाकुन्तलं वैदिकमूल्यानां साहित्यिकप्रतिबिम्बरूपेण न केवलं संस्कृतनाट्यपरम्परायाः महत्त्वपूर्णा कृतिः अपितु भारतीयजीवनमूल्यानामपि प्रकाशिका वर्तते।

<u>सन्दर्भ ग्रन्थ सूची</u>

1. अथर्ववेद संहिता. सायणभाष्य, भाग 1-4, सम्पादक विश्वबन्धु, विशेश्वरानन्द वैदिक शोध संस्थान, होशियारपुर, प्रथम संस्करण, 1960।

2. अथर्ववेद संहिता. सुभाषभाष्य, भाग 1-5, श्रीपाद दामोदर सातवलेकर, स्वाध्याय मण्डल, पारडी, गुजरात, तृतीय संस्करण, 1957-58।
3. अथर्ववेद संहिता. सनातकभाष्य, सम्पादक श्री कण्वशास्त्री, भाष्य पुस्तकालय, कमलानगर, दिल्ली, प्रथम संस्करण, 2000।
4. अथर्ववेद संहिता. हिन्दी अनुवाद, सम्पादक पं. श्रीराम शर्मा आचार्य, ब्रह्मवर्चस, शान्तिकुञ्ज, हरिद्वार, सप्तम आवृत्ति, 2005।
5. उपाध्याय, बलदेव. भारतीय साहित्यशास्त्र, प्रसाद परिषद्, काशी, 2007।
6. उपाध्याय, बलदेव. संस्कृत वाङ्मय का बृहद इतिहास, शारदा मन्दिर, वाराणसी, 1969।
7. उपाध्याय, बलदेव. संस्कृत सूक्ति समीक्षा, काशी, 1963।
8. उपाध्याय, बलदेव. वैदिक साहित्य एवं संस्कृति, शारदा संस्थान, वाराणसी, पंचम संस्करण, 1998
9. ऋग्वेद संहिता. सायणभाष्य, वैदिक शोध मण्डल, पूना, 1933-51।
10. ऋग्वेद संहिता. मैक्समूलर, सायणभाष्य सहित, 4 भाग, द्वितीय संस्करण, ऑक्सफोर्ड, 1892।
11. ऋग्वेद संहिता. पं. रामगोविन्द त्रिवेदी द्वारा हिन्दी अनुवाद, सायणभाष्य सहित, चौखम्बा संस्कृत भवन, वाराणसी।
12. ऋग्वेद संहिता. एच. एच. विल्सन द्वारा अंग्रेजी अनुवाद, 1950।
13. ऋग्वेद संहिता. टी. एच. ग्रिफिथ द्वारा अंग्रेजी अनुवाद, काशी, 1992।
14. काणे, पी वी. हिस्ट्री ऑफ धर्मशास्त्र. खण्ड 1, 2 एवं 3, पूना, 1941
15. कालिदास. अभिज्ञानशाकुन्तलम्, आचार्य ... द्विवेदी द्वारा सम्पादित, द्वितीय संस्करण, आगरा, 1962।
16. कालिदास. अभिज्ञानशाकुन्तलम्, डॉ. बहुराम त्रिपाठी द्वारा सम्पादित, चतुर्थ संस्करण, चौखम्बा भारतीय प्रकाशन, वाराणसी।
17. कालिदास. अभिज्ञानशाकुन्तलम्, डॉ. कृष्णमणि त्रिपाठी द्वारा सम्पादित।
18. कालिदास. कुमारसम्भवम्, सूर्यकान्त द्वारा सम्पादित, साहित्य अकादमी, दिल्ली, 1958।
19. कालिदास. कुमारसम्भवम्, श्री पी. पी. प्रधान पाण्डेय द्वारा सम्पादित, चौखम्बा विद्याभवन, वाराणसी, 1970।

20. कालिदास. रघुवंशम्, निर्णय सागर प्रेस, बम्बई, 1948।
21. कीथ, ए. बी. संस्कृत साहित्य का इतिहास, मोतीलाल बनारसीदास, 1965।
22. कुल्लूक भट्ट. मनुस्मृति, मन्वर्थमुक्तावली सहित।
23. गैरोला वाचस्पति. भारतीय संस्कृति और कला, हरि माधव शरण, उत्तर प्रदेश हिन्दी संस्थान, लखनऊ।
24. तैत्तिरीय ब्राह्मण. सम्पादक हरि नारायण आप्टे, आनन्दाश्रम, पूना, 1898।
25. तैत्तिरीय संहिता. स्वाध्याय मण्डल, पारडी, 1957।
26. त्रिपाठी, रामचन्द्र. महर्षि कालिदास, श्रीकृष्ण भारतीय प्रकाशन, वाराणसी, 1966।
27. मिश्र, एम. एल. भारतीय साहित्य का इतिहास, मोतीलाल बनारसीदास, वाराणसी।
28. व्यास. महाभारतम्. डॉ. द्वारा सम्पादित, चतुर्थ संस्करण, काशी हिन्दू विश्वविद्यालय, वाराणसी।
29. विश्वनाथ. साहित्यदर्पण, डॉ. सिंह द्वारा सम्पादित, द्वितीय संस्करण, श्रीकृष्ण भारतीय प्रकाशन, वाराणसी, 1963।